योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १२४

चतुर्विंशत्यधिकशततमः सर्गः १२४

श्रीवसिष्ठ उवाच ।

यथा सत्त्वमुपेक्ष्य स्वं शनैर्विप्रो दुरीहया ।

अङ्गीकरोति शूद्रत्वं तथा जीवत्वमीश्वरः ।। १

भूतानि द्विविधान्येव प्रतिसर्गे स्फुरन्ति वै ।

आद्यविस्पन्दजातानि तानि निष्कारणानि वै ।। २

ईश्वरात्समुपागत्य पुनर्जन्मान्तराणि च ।

भूतान्यनुभवत्यङ्ग स्वकृतैरेव कर्मभिः ।। ३

कार्यकारणभावोऽयमीदृशो जन्मकर्मणोः ।

अकारणमुपायान्ति सर्वे जीवा परात्पदात् ।। ४

पश्चात्तेषां स्वकर्माणि कारणं सुखदुःखयोः ।

आत्मज्ञानात्समुत्पन्नः संकल्पः कर्मकारणम् ।। ५

संकल्पित्वं हि बन्धस्य कारणं तत्परित्यज ।

मोक्षस्तु निःसंकल्पित्वं तदभ्यासपरो भव ।। ६

सावधानो भव त्वं च ग्राह्यग्राहकसंभ्रमे ।

अजस्रमेव संकल्पदशाः परिहरञ्छनैः ।। ७

मा भव ग्राह्यभावात्मा ग्राह्यकात्मा च मा भव ।

भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव ।। ८

अजस्रं यं यमेवार्थं पतत्यक्षगणोऽनघ ।

बध्यते तत्र रागेण तत्रारागेण मुच्यते ।। ९

किंचिद्यद्रोचते तुभ्यं तद्बद्धोऽसि भवस्थितौ ।

न किंचिद्रोचते चित्ते तन्मुक्तोऽसि भवस्थितौ ।। १०

तस्मात्पदार्थनिचयात्सह स्थावरजङ्गमात् ।

तृणादेर्देवकायान्तान्मा किंचित्तव रोचताम् ।। ११

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

न कर्तासि न भोक्तासि तत्र मुक्तमतिः शमी ।। १२

सन्तोऽतीतं न शोचन्ति भविष्यच्चिन्तयन्ति नो ।

वर्तमानं च गृह्णन्ति कर्म प्राप्तमखण्डितम् ।। १३

मनसि ग्रथिता भावास्तृष्णामोहमदादयः ।

मनसैव मनो राम च्छेदनीयं विजानता ।। १४

विवेकेनातितीक्ष्णेन बलादय इवायसा ।

मनसैव मनश्छिन्धि सर्वभ्रमस्य शान्तये ।। १५

क्षालयन्ति मलेनैव मलं क्षालनकोविदाः ।

वारयन्त्यस्त्रमस्त्रेण विषं प्रति विषेण च ।। १६

जीवस्य त्रीणि रूपाणि स्थूलसूक्ष्मपराणि च ।

तत्रास्य यत्परं रूपं तद्भज द्वे परित्यज ।। १७

पाणिपादमयो योऽयं देहो भोगाय वल्गति ।

भोगार्थमेतज्जीवस्य रूपं स्थूलमिहास्थितम् ।। १८

स्वसंकल्पमयाकारं यावत्संसारभावि यत् ।

चित्तं तद्विद्धि जीवस्य रूपं रामातिवाहिकम् ।। १९

आद्यन्तरहितं सत्यं चिन्मात्रं निर्विकल्पकम् ।

यत्तद्विद्धि परं रूपं तृतीयं विश्वरूपकम् ।। २०

एतत्तुर्यपदं शुद्धमत्र बद्धपदो भव ।

संपरित्यज्य पूर्वे द्वे मा तत्रात्ममतिर्भव ।। २१

श्रीराम उवाच ।

जाग्रत्स्वप्नसुषुप्तेषु स्थितं त्रिष्वप्यलक्षितम् ।

तुर्यं ब्रूहि विशेषेण विविच्य मुनिनायक ।। २२

श्रीवसिष्ठ उवाच ।

अहंभावानहंभावौ त्यक्त्वा सदसती तथा ।

यदसक्तं समं स्वच्छं स्थितं तत्तुर्यमुच्यते ।। २३

या स्वच्छा समता शान्ता जीवन्मुक्तव्यवस्थितिः ।

साक्ष्यवस्था व्यवहृतौ सा तुर्यकलनोच्यते ।। २४

नैतज्जाग्रन्न च स्वप्नं संकल्पानामसंभवात् ।

सुषुप्तभावो नाप्येतदभावाज्जडता स्थितेः ।। २५

शान्तं सम्यक्प्रबुद्धानां यथास्थितमिदं जगत् ।

विलीनं तुर्यमेवाहुरबुद्धानां स्थिरं स्थितम् ।। २६

अहंकारकलात्यागे समतायाः समुद्भवे ।

विशरारौ कृते चित्ते तुर्यावस्थोपतिष्ठते ।। २७

अथेमं श्रृणु दृष्टान्तं कथ्यमानं मयाधुना ।

प्रबुद्धोऽपि यथा बोधमुपैषि विबुधोपम ।। २८

कस्मिंश्चित्काननाभोगे महामौनं व्यवस्थितम् ।

दृष्ट्वाद्भुतमिदं किंचिन्मुनिं पप्रच्छ लुब्धकः ।। २९

पश्चादुपगतो बाणभिन्नं मृगमभिद्रुतम् ।

मुने मदीयबाणेन विद्धो मृग इहागतः ।। ३०

क्व प्रयातो मृग इति प्रत्युवाच स तं मुनिः ।

समशीला वयं साधो मुनयो वनवासिनः ।। ३१

नास्माकमस्त्यहंकारो व्यवहारेषु यः क्षमः ।

सर्वाणीन्द्रियकर्माणि करोति हि सखे मनः ।। ३२

अहंकारमयं तन्मे नूनं प्रगलितं चिरम् ।

जाग्रत्स्वप्नसुषुप्ताख्या दशा वेद्मि न काश्चन ।। ३३

तुर्य एव हि तिष्ठेऽहं तत्र दृश्यं न विद्यते ।

इति तस्य वचः श्रुत्वा मुनिनाथस्य राघव ।। ३४

लुब्धकोऽर्थमविज्ञाय जगामाभिमतां दिशम् ।

अतो वच्मि महाबाहो नास्ति तुर्येतरा दशा ।। ३५

निर्विकल्पा हि चित्तुर्यं तदेवास्तीह नेतरत् ।

जाग्रत्स्वप्नसुषुप्ताख्यं त्रयं रूपं हि चेतसः ।। ३६

घोरं शान्तं च मूढं च आत्मचित्तमिहास्थितम् ।

घोरं जाग्रन्मयं चित्तं शान्तं स्वप्नमयं स्थितम् ।। ३७

मूढं सुषुप्तभावस्थं त्रिभिर्हीनं मृतं भवेत् ।

यच्च चित्तं मृतं तत्र सत्त्वमेकं स्थितं समम् ।

तदेव योगिनः सर्वे यत्नात्संपादयन्ति हि ।। ३८

समस्तसंकल्पविलासमुक्तं

तुर्ये पदे तिष्ठ निरामयात्मा ।

यत्र स्थिताः साधु सदैव मुक्ताः

प्रशान्तभेदा मुनयो महान्तः ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० मृगव्याधीयं नाम चतुर्विंशत्यधिकशततमः सर्गः ।। १२४।।